च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते । प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् । अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते । अदाम्भिको निरारम्भो लघ्वाहारो जितेन्द्रियः । विमुक्तः सर्वसङ्गैर्यः स तीर्थफलमश्नुते । अकोपनोऽमलमतिः सत्यवादी दृढव्रतः । आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते । अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः । हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः । इति काशीखण्डम् । प्रा०त० । तीर्थप्रतिग्रहे दोषो यथा ।

"तीर्थेन प्रतिगृह्णीयात् संक्रान्त्यादिषु च तथा । स्वकार्ये पितृकार्येऽपि देवताभ्यर्च्चनेऽपि वा । निष्फलं तस्य तत्तीर्थं यावत्तद्धनमश्नुते" । "तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे । वाराणस्यां वदर्य्याञ्च गङ्गासागरसङ्गमे । पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले । हरिद्वारे च केदारे सोमे वदरपाचने । सरस्वतीनदीतीरे पुण्ये वृन्दावने वने । गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमालये । एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः । स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च" इति ब्रह्मवै०प्र०ख० । शङ्खः "तीर्थं प्राप्यानुषङ्गेन स्नानं तीर्थे समाचरन् । स्नानजं फलमाप्नोति तीर्थयात्राफलं न तु" । तथा यस्य पादौ च हस्तौ च मनश्चैव सुसंयुतम् । विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते । नृणां पापकृतां तीर्थे भवेत् पापस्य संक्षयः । यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां नृणाम्" । हस्तसंयमोऽत्र निन्दितप्रतिग्रहादिनिवृत्तिः । पादसंयमस्तु अगम्यदेशादिगमननिवृत्तिः । मनःसंयमः कामक्रोधादिनिवृत्तिः, विद्या तत्तत्तीर्थफलबोधकसच्छास्त्रवेदाद्यधिगमरूपा । तपः आमिषादिनिवृत्तिः । कीर्त्तिः धर्मार्थतीर्थगमने धार्मिकत्वादिना प्रसिद्धिः । फलं सम्यगिति शेषः । एतच्च हस्तसंयमनादितीर्थयात्राङ्गं महाभारते तीर्थयात्रासुपक्रम्याभिधानात् तीर्थस्नानादिकर्माङ्गञ्च, प्रसङ्गेन यात्राप्रकरणमन्तरेणैव सतीर्थफलमश्नुते इति सामान्याभिधानात् । इति कल्पतरुः । अतएव पैठीनसिः "षोड़शांशं स लभते यः परार्थेन गच्छति । अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति" । परार्थेन वेतनादिना, प्रसङ्गेन उद्देश्यान्तरप्रसङ्गेन । "तथा प्रतिकृतिं कृत्वा तीर्थवारिणि मज्जयेत् । मज्जयेत्तु यमुद्दिश्य अष्टभागं लभेत सः" ।

तीर्थयात्राविधानं यथा "यो यः कश्चित्तीर्थयात्रान्तु गच्छेत् । सुसंयतः स च पूर्वं गृहे स्वे । कृतोपवासः शुचिरप्रमत्तः संपूजयेद्भक्तिनम्रो गणेशम् । देवान् पितॄन् ब्राह्मणांश्चैव साधून् धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात् । प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्राह्मणान् पूजयेच्च । एवं कुर्वतस्तस्य तीर्थे यदुक्तं फलं तत् स्यान्नात्र सन्देह एव" इति ब्रह्मपुराणम् । एतदधिकारे प्रा०त० ।

"सुसंयतः पूर्वदिने कृतैकभक्तादिनियमः । तदुत्तरदिने कृतोपवासस्तदुत्तरदिने गणेशं ग्रहानिष्टदेवताञ्च संपूज्य वृद्धिश्राद्धं कृत्वा ब्राह्मणान् भोजयेत् । ततः शुभलग्ने यात्रां कुर्य्यात् तीर्थयात्रान्तु गच्छेदित्युपक्रमादुपवासदिने मुण्डनमपि । "प्रयागे तीर्थयात्रायां पितृमातृवियोगतः । कचानां वपनं कार्य्यं न वृथा विकचो भवेत्" इति विष्णुपुराणवचनात् । प्रवेशेऽपि तीर्थयात्रायामिति वक्तव्यम् । "गच्छन् देशान्तरं यस्तु श्राद्धं कुर्य्यात्तु सर्पिषा । यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः" इति भविष्यपुराणादिति गङ्गावाक्यावली । वस्तुतस्तु तीर्थप्रत्यागमनोत्तरस्वगृहप्रवेशे इत्येव वक्तव्यम् । यात्राप्रत्यागमनोत्तरस्वगृहप्रवेशयोर्भेदात् प्रत्यागमनोत्तरलाभस्तु प्रत्यागतश्चापीति प्रागुक्तत्वात् व्यक्तमाह हलायुधधृतं कूर्मपुराणवचनम् "तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च । वृद्धिश्राद्धं प्रकुर्वीत बहुसर्पिःसमन्वितम्" । ततश्च प्रवेशे चेति चकारेण श्राद्धमात्रं समुच्चितम् । नतु तस्य यात्रार्थत्वमपीति । एवं देवान् पितॄनित्यभिधानात् तत्पूजनमेव पुनः कार्य्यं नतूपवासादिकमपि अन्यथा देवानित्यादिकं व्यर्थं स्यात् । मत्स्यपुराणम् "तिलोदकाञ्जलिर्देयोजलस्थैस्तीर्थवासिभिः । सदा न हस्तेनैकेन गृहे श्राद्धं समिष्यते" । अत्र जलस्थैरित्यनेन स्थलस्थानामपि जलस्थत्वं नियम्यते । तथा हि "अन्तरुदके आचान्तो अन्तरेव शुद्धोभवति । तस्मादन्तरेकं वहिरेकञ्च पादं कृत्वा आचामेत् सर्वत्र शुद्धोभवति" इति पैठीनस्युक्तेन जलैकचरणकृताचमनेन उभयत्र कर्म्मार्हत्वात् तर्पणकाले तीर्थे जलैकचरणत्वं प्रतीयते । अन्यत्र त्वनियमः । तद्रूपाणां जले च तर्पणमविरुद्धमिति । गृह इति स्थलोपलक्षणम् । देवीपुराणे । "अकालेऽप्यथ वा काले तीर्थश्राद्धं तथा नरैः । प्राप्तैरेव सदा कार्य्यं कर्त्तव्यं